**C-11, Unit-1, Tarkasamgraha (Marks-10)**

## १. कस्तावद् अभावः? अन्नंभट्टम् अनुसृत्य सलक्षणं सोदाहरणं च अभावस्य विभागाः आलोचनीयाः।

**उत्तरम्**—— न्याय-वैशेषिकदर्शने सप्त पदार्थाः स्वीकृताः । तत्र अभावः सप्तमः पदार्थः। अनंभट्टेन अभावस्य सामान्यलक्षणं न कृतम्। यतः**, 'भावभिन्नत्वम् अभावत्वम्'** इति लक्षणे कृते आत्माश्रयदोषः भवेत्। यावत् अभावस्य न सिद्धिः तावत् **'अभावभिन्नत्वम् भावत्वम्'** इति भावस्य लक्षणं न क्रियेत, अन्योन्याश्रत्वात्। अतः अभावत्वरूपः अखण्डोपाधिरेव अभावस्य सामान्यलक्षणम् इति अन्नंभट्टस्य अभिप्रेतम्।

**'निषेधाभिलापक-प्रत्ययगम्यत्वम् अभाववत्वम्'** इति कथञ्चित् अभावस्य लक्षणं कर्तुं शक्यते। निषेधवोधकैः नवादिभिः शद्वैः उल्लिखितस्य ज्ञानस्य यः विषयः स एव अभावः इति । **'इह इदं नास्ति, इदम् एतत् न भवति'** इत्येवं ज्ञाने निषेधबोधकस्य नञ्-शब्दस्य अर्थः विषयः। अयं नञ्- पदार्थ एव अभावः। मुक्तावल्याम् अभावस्य लक्षणं कृतम्**- 'अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्वम्' इति।**

**<u>अभावस्य भेदाः</u>**—अभावस्य विभाद-प्रसङ्गेन अन्नंभट्ट आह- **'अभावश्चतुर्विधः - प्रागभावः प्रध्वंसाभावः अत्यन्ताभावः अन्योन्याभावश्चेति।'** प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः अन्योन्योभावश्च इति चतुर्विधः अभावः । भाषापरिच्छेदानुसारम् अभावः प्रधानतः द्विविधः संसर्गाभावः अन्योन्याभावश्चेति। संसर्गाभावः पुनः त्रिविधः-- प्रागभावः, ध्वंसाभावः, अत्यन्ताभावश्चेति।

**<u>प्रागभावः</u>** –

अन्नंभट्ट कृतं प्रागभाव-लक्षणम्**- 'अनादिः सान्तः प्रागभावः, उत्पत्तेः पूर्वं कार्यस्य'** इति । यस्य अभावस्य आदिः उत्पत्तिः वा नास्ति, परन्तु विनाशोऽस्ति स प्रागभावः इति। अयमभावः कोर्योत्पत्तेः पूर्वं समवायिकारणे प्रतीयते ।

प्रागभाव-लक्षणे **'सान्तः'** इति पदम् आकाशादौ अतिव्याप्ति-वारणाय सन्निविष्टम् । आकाशः आत्मा इत्यादि अनादि द्रव्यम्, परन्तु न विनाश-शीलम् । घटादौ अतिव्याप्ति-वारणाय अनादिः इति पदं सन्निविष्टम्। घटादिः विनाशशीलोऽपि न अनादिः । मुक्तावल्यां प्रागभावस्य लक्षणं कृतम्**-** **'विनाश्यभावत्वं प्रागभावत्वम्।'**

प्रतियोगिजनकः भविष्यति इति व्यवहारहेतुः प्रागभावः । प्रागभावः स्व-प्रतियोगिनः समवायिकारणे वर्तते। यथा-पटस्य समवायिकारणं तन्तुः पटस्य प्रागभावः तन्तौ विद्यते। 'इह तन्तौ पटः भविष्यति' इत्येवं 'भविष्यति' इति क्रियया प्रागभावस्य व्यवहारः भवति।

**<u>प्रध्वंसाभावः</u>** –

अन्नंभट्टेन अस्य लक्षणं कृतम्- **'सादिरनन्तः प्रध्वंसः, उत्पत्त्यनन्तरं कार्यस्य'** इति। यस्य अभावस्य उत्पत्तिः अस्ति, परन्तु विनाशः नास्ति, स प्रध्वंसाभावः इति। घटादौ विनाश-शीले पदार्थे अतिव्याप्ति-वारणाय लक्षणे **'अनन्तः'** इति पदम्। आकाशादौ उत्पत्तिशून्ये पदार्थे अतिव्याप्ति-वारणाय 'सादिः' इति पदम्। अयम् अभावः उत्पत्तेः परं समवायिकारणे विद्यते।

द्वयोः कपालयोः संयोगेन घटोत्पत्तेः परं घटभग्ने कृते कपालयोः यः घटाभावः, स एव घटध्वंसः। प्रतियोगी घटः अस्य ध्वंसस्य जनकः । भाषापरिच्छेदे ध्वंसाभावस्य लक्षणं कृतम्-- ' जन्याभावत्वं ध्वंसत्वम्' इति।

**<u>अत्यन्ताभावः</u>—**

अन्नंभट्टेन अस्य लक्षणं कृतम्- 'त्रैकालिक-संसर्गावच्छिन्न-प्रतियोगिताकः अत्यन्ताभावः' इति। अत्र संसर्गस्य अर्थः—तादात्म्यातिरिक्तः सम्बन्धः । अवच्छिन्नः विशेषितः। यस्य वस्तुनः अभाव-ज्ञानं भवति तद् वस्तु प्रतियोगि, तस्य धर्मः प्रतियोगिता। अतः यः नित्यः, तथा तादात्म्यातिरिक्त-सम्बन्धेन यस्य प्रतियोगिता विशेषिता, स एव अत्यन्ताभावः इति। भाषापरिच्छेदे अत्यन्ताभावस्य लक्षणं कृतम्**-** **'नित्यसंसर्गाभावत्वम् अत्यन्ताभावत्वम्।'** अन्योन्याभावे अतिव्याप्ति-वारणाय संसर्गावच्छिन्नेति । ध्वंसप्रागभावयोः अतिव्याप्ति-वारणाय त्रैकालिक इति। 'नास्ति'-शब्देन

त्रैकालिकः अभावः बोद्धव्यः। यथा— **भूतले घटः नास्ति** । अन्यग्रन्थे उदाहरणम्-- 'वायौ रूपः नास्ति ।'

<u>**अन्योन्याभावः**</u>-

अन्नंभट्टेन अस्य लक्षणं कृतम्-- **'तादात्म्य-सम्बन्धावच्छिन्न-प्रतियोगिताकः अन्योन्याभावः'** इति । तादात्म्यसम्बन्धः (अभेदसम्बन्धः) यस्य प्रतियोगितायाः अवच्छेदकः भवति, सः अत्यन्ताभावः इति। **'न'** इत्यनेन अन्योन्याभावः बोध्यते। भाषापरिच्छेदे अन्योन्याभावस्य लक्षण कृतम् - **'अन्योन्याभावत्वं तादात्म्य-सम्बन्धावच्छिन्न प्रतियोगिताकाभावत्वम्'** इति।

यथा- **घटः पटः न** ।